International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(1): 31-35
© 2022 IJSR
www.anantaajournal.com
Received: 10-10-2021
Accepted: 30-12-2021

**दिव्यरञ्जन:**
शोधच्छात्र:, गुरुकुलकाँगडी (सम)विश्वविद्यालयः, हरिद्वारम्, उत्तराखंड, भारत

**Corresponding Author:**
**दिव्यरञ्जन:**
शोधच्छात्र:, गुरुकुलकाँगडी (सम)विश्वविद्यालयः, हरिद्वारम्, उत्तराखंड, भारत

# पाणिनीयव्याकरणे कारकाणां विवक्षाधीनता

## दिव्यरञ्जन:

यैर्व्यापारभेदै: कारकाणां भेदा भवन्ति, ते भेदा विवक्षाधीनास्सन्ति न तु तात्त्विका:। अर्थात् यस्य व्यापारस्य यथा विवक्षा भवति तत् तदनुरूपमेव कारकमभिमन्यते इदमेव च व्याकरणसम्प्रदाये 'विवक्षात: कारकाणि भवन्ती' ति न्यायाधारेण प्रयुज्यते। उदाहरणार्थं यदा यस्य व्यापारविवक्षा सर्वथा स्वतन्त्ररूपेण करिष्यते तदा तत्कर्त्तृकारकं भविष्यति। एवमेव वस्तुस्थित्याधारेण तत्करणाधिकरणादिरूपेण भवितुमर्हति। यद्वयं तत्त्वत: 'स्थाल्यां पचती' ति वाक्ये 'स्थालीम्' अधिकरणरूपेण दर्शयाम:, किन्तु पाकक्रियां स्थाल्या सह योजयित्वा 'स्थाली पचती'त्यपि वक्तुं शक्नुम:। एवमेव 'अग्नौ पचती'ति स्थाने 'अग्नि: पचती'त्यपि वक्तुं शक्नुम:। एवमेव अन्यान्यकारकेष्वपि परिवर्त्तनं कर्तुं शक्यते।

एतदाधारेण वक्तुं शक्यते यत् कारकाणि प्राय: विवक्षाधीनानि भवन्ति। अत एव स्वव्यापारस्य स्वातन्त्र्यविवक्षायां कर्मकरणाधिकरण्यान्येव कर्त्तृरूपेण भवन्ति। यथा ह्युपर्युक्तोदाहरणेषु दर्शितम्। अत्रापि 'काष्ठं भिनत्ती'ति स्थाने 'काष्ठं भिद्यते', 'काष्ठै: पचती'ति स्थाने 'काष्ठानि पचन्ति', 'स्थाल्यां पचती'ति स्थाने च 'स्थाली पचति'ति प्रयोगा: दृश्यन्ते। भाष्यकारेणोक्तं यत् 'स्थालीस्थितव्यापारस्य विवक्षायां स्थाल्यपि स्वतन्त्रा अर्थात् कर्त्तृकारके भवति।'

करणकारकमपि विवक्षाधीनं भवति। 'स्थाल्यां पचती'ति स्थाने सत्यां विवक्षायां 'स्थाल्या पच्यते' इति प्रयोगोऽपि दृश्यते। किमपि विशिष्टं वस्तु करणरूपेण व्यवस्थितं न भवति, अपितु यस्मिन् वस्तुनि 'साधकतमस्य' विवक्षा भवति तदेव करणकारकं भवति।[1]

सम्प्रदानापादाने कदाचिदपि कर्त्तृरूपेण न भवितुमर्हतो यतस्ते स्वव्यापारे स्वतन्त्रे न भवत:। सम्प्रदानकारके ग्रहीतुस्तथापादानेऽपायवत: अपेक्षा सदा भवत्येव।[2] अत एव 'ग्रामादागच्छती'ति स्थाने 'ग्राम आगच्छति' तथा 'ब्राह्मणाय ददाती'ति स्थाने 'ब्राह्मणो ददाती'ति प्रयोगा न भवन्ति।

---

[1] वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्। स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत:।। वाक्यपदीयम्-3/7/91

[2] सम्प्रदानापादनयो: स्वव्यापारे स्वातन्त्र्यविवक्षा नास्ति, द्वितीयस्यादातुरपगन्तुश्चापेक्षणात्।। वाक्यपदीयम्-3/7/18

एतयोः कारकयोः प्रयुक्ताः शब्दाः स्वभावतः परतन्त्राः भवन्ति।[3] एकस्मिन् वाक्ये एक एव पदार्थो विवक्षाभेदेन भिन्न-भिन्नकारकैर्युक्तो भवितुमर्हति। 'आत्मा आत्मना आत्मानं जानाती' ति वाक्ये एक एव आत्मपदार्थो बुद्धिभेदेन कर्त्तृकरणकर्मकारकैर्युक्तो भवति।[4]

सम्बन्धविवक्षायां प्रायः सर्वेषां कारकाणां स्थाने षष्ठीविभक्तेः प्रयोगो दृश्यते।[5] 'मातुः स्मरति', 'फलानां तृप्तः', 'रजकस्य वस्त्राणि ददाति', 'वृक्षस्य पत्रं पतति', नराणां नापितो धूर्त्तः' इत्यादिवाक्येषु क्रमशः कर्मकरणसम्प्रदानापादानाधिकरणानां स्थाने षष्ठ्याः प्रयोगो दृश्यते। 'सतां गतम्' इत्यस्यार्थः 'सत्सम्बन्धिगमनम्' अस्ति। अत्र कर्त्तृत्वसम्बन्धद्योतनाय षष्ठ्याः प्रयोगोऽभवत्। कर्त्तृविवक्षायां 'सद्भिर्गतम्' प्रयोगो भवति।

एवमेव यदा विवक्षाभेदेन अपादानाधिकरणकर्त्तृकरणादिविभिन्नप्रयोगाः भवन्ति, तदा वाक्यस्य व्याख्या भिन्ना भवति तथा कस्मिंश्चित्कारके सति वाक्यस्य या व्याख्या भविष्यति, सा तस्य कारकस्य स्थाने परस्मिन्कारके स्थितेऽपि भविष्यति? अस्य प्रश्नस्य समाधाने आचार्यकैय्यटः उदाहरणसहितं विवेचितवान्।

भाष्यकारवचनमिदम्- 'तयोः स्वातन्त्र्यपारतन्त्र्ययोः पर्यायेण वचनं भविष्यति। तद्यथा- 'बलाहकाद् विद्योतते विद्युत्, बलाहके विद्योतते, बलाहको विद्योतते।[6] अत्र एकस्यैवार्थस्य कृते अपादानाधिकरणकर्त्तृप्रयोगो विहितः, परन्तु कारकभेदत्वात् क्रियायाः व्याख्या भिन्ना भविष्यति। अपादानपक्षेऽर्थो भविष्यति- 'निस्सारणाङ्गे विद्योतने द्युतिर्वर्त्तते पृथग्भावश्च विवक्षित इत्यपादनत्वम्' । अधिकरणपक्षेऽर्थो भविष्यति- 'स्थित्यङ्गे द्योतनेऽत्र द्युतिर्वर्त्तते। बलाहके स्थित्वा ज्योतीरूपा विद्युद् विद्योतते इत्यर्थः। कर्त्तृपक्षे चार्थो भविष्यति- 'विद्युतो बलाहकस्य च अभेदविवक्षायामयं प्रयोगः'। विवक्षानुसारिण इमे भेदाः, यद्यपि वस्तुस्थितिस्समाना वर्त्तते, तथ्यमिदं कैय्यटेन स्पष्टं प्रतिपादितम्- 'वस्तुत एक एव अर्थात्मा'[7] इति। विवक्षाभेदेनान्यान्यकारकेषु ये भेदा भवन्ति, तेषामुदाहरणानि यथास्थानमपि प्रदत्तानि सन्ति।

**कारकेषु परस्परं बाध्यबाधकभाव**

कारकेषु यत्र विवक्षाधीनताया न्यायो दृश्यते, तत्रैव परस्परं तेषां बाध्य-बाधकभावोऽपि भवति। अतः एकस्मिन्नेव स्थले यदैकाधिककारकाणां प्राप्तिर्भवति, तदा तत्र पूर्वापेक्षया परमेव कारकं बलवद्भवति। इदमेव तथ्यं 'शब्दशक्तिप्रकाशिकाया' मपि वर्णितमस्ति।[8]

कारकाणां पौर्वापर्यं परिभाषयितुं तेषां क्रमः स एव गृह्यते यं क्रमं वैयाकरणाः अङ्गीकुर्वन्ति। पाणिनिदृशा 'अपादान-सम्प्रदान-करण-अधिकरण-कर्म-कर्त्ता' इत्येष क्रमः।[9] अत एव तन्मते पूर्वापेक्षया परं कारकं बलवद्भविष्यति।[10] अतः सर्वकारकेषु 'कर्त्तृकारकं' बलवत्तमम्, ततश्च 'कर्म', 'अधिकरणं', 'करणं', 'सम्प्रदानम्', 'अपादान' मित्येतानि कारकाणि भविष्यन्ति। इममेव भावं स्पष्टयता महाभाष्यकारेणापादानकारकं परकारकमुत्तरकारकं वा मतम्। 'धनुषा विध्यती' ति वाक्ये करणं, 'कंसपात्र्यां भुङ्क्ते' इति वाक्येऽधिकरणं, 'गां दोग्धी' ति वाक्ये कर्म तथा च 'धनुर्विध्यती' ति वाक्ये कर्त्तृकारकमपादानस्य बाधकं भवति। 'क्रूरम् अभिक्रुध्यती' ति वाक्ये कर्म 'सम्प्रदानस्य' बाधकं भवति, 'असिश्छिनत्ती' ति वाक्ये कर्त्तृकारकं 'करणस्य' बाधकं भवति, 'गेहं प्रविशती' ति वाक्ये कर्म 'अधिकरणस्य' बाधकं भवति तथा च 'स्थाली पचती' ति वाक्ये कर्त्तृकारकम् 'अधिकरणस्य' बाधकं भवति।[11] एतान्युदाहरणानि यथास्थानमग्रे विश्लिष्टानि सन्ति।

यद्येकस्यैव कारकस्य द्वाभ्यां क्रियाभ्यां सह योगो भवति चेद्विभक्तिः प्रधानक्रियानुसारिणी भवति।[12] 'ब्राह्मणाय आहूय ददाती' ति वाक्ये ब्राह्मणस्य सम्बन्धः 'आहूय' तथा 'ददाती' त्येताभ्यां क्रियाभ्यां सह अस्ति। 'आहूय' इति क्रियानुसारेणात्र कर्मकारकं(द्वितीयाविभक्तिः) प्राप्नोति, परन्तु प्रधानक्रिया 'ददाती' त्यनेन प्रतिपाद्यते, अतः

---

[3] ग्राम आगच्छति- इत्यर्थान्तरावगमादपादानव्यापारानवसायात् प्रयोगाभावः। एवं ब्राह्मणाय ददाति, इत्यर्थे ब्राह्मणो ददाति-इति प्रयोगाभावः। म.भा.प्र.-1/4/23

[4] एकस्य बुद्ध्यवस्थाभिर्भेदे च परिकल्पिते। कर्मत्वं च करणत्वं च कर्त्तृत्वं चोपजायते।। वाक्यपदीयम्- 3/7/104

[5] कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव।। सि.कौ.-का.प्र.-सू.-606

[6] महाभाष्यम्-1/4/23

[7] महाभाष्य प्रदीपः- 1/4/23

[8] एकस्यैकक्रियायान्तु कारकद्वयबोधने। यत्परं कारकं तत्र विहिता सुबपेक्षिता।। शब्दशक्तिप्रकाशिका- 82

[9] अपादानसम्प्रदानकरणाधारकर्मणाम्। कर्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्तते।। शब्दशक्तिप्रकाशिका

[10] विप्रतिषेधे परं कार्यम्। अष्टाध्यायी-1/4/2

[11] अपादानमुत्तराणि धनुषा विध्यति, कंसपात्र्यां भुङ्क्ते, गां दोग्धि, धनुर्विध्यति इति। क्रुधद्रुहोरुपसृष्टयोः क्रम 'सम्प्रदानम्'। करणं पराणि, धनुर्विध्यति, असिश्छिनत्ति। अधिकरणं कर्म- गेहे प्रविशति। अधिकरणं कर्त्ता- स्थाली पचति। अध्युपसृष्टं कर्म। महाभाष्यम्-1/4/1

[12] गौणप्रधानक्रिययोः प्रकारीभूतकारके। एकस्मिन् वापि भिन्ने वा प्रधानापेक्षया स्थितिः।। शब्दशक्तिप्रकाशिका-81

सम्प्रदानसंज्ञया चतुर्थी विभक्तिः क्रियते। 'वृक्षाद् आरुह्य पतती' त्यस्मिन् वाक्येऽपि वृक्षस्य सम्बन्धः 'आरुह्य' तथा 'पतती' त्येताभ्यां क्रियाभ्यां सह अस्ति। अत्रापि प्रधानक्रिया (पत्)- योगेन 'वृक्षात्' इति पञ्चमी विभक्त्यन्तः प्रयोगोऽभवत्।

कलापवैयाकरणानां मते करणापेक्षयाऽधिकरणं बलवत्तरम्, यतस्तैः पूर्वमधिकरणकारकं विविच्यानन्तरं करणकारकं प्रस्तुतम्।[13]

**कारकाणां जन्यजनकभाव**

क्रियाकारकयोर्जन्यजनकभावसम्बन्धोऽस्ति। सम्प्रति विचारणीयमिदं यत् किमत्र क्रियां विना वाक्ये क्रियाप्रयोगः समुचितः? उत वा व्यतिरेकिभावे कारकं विना वाक्ये क्रियाप्रयोगः सम्भाव्यते? यदा हि भाष्यवार्त्तिके प्रतिपादितमिदं यत् कारके वाक्ये वा एकस्य तिङः तिङन्तक्रियाया वा सत्ता परमावश्यकी।[14] सम्प्रति प्रतिकारकं कानिचिदुदाहरणानि दीयन्ते, यत्र कारकस्य क्रियायाश्च साक्षात् सहप्रयोगो न दृश्यते। परिणामतः कारकेष्वनुप्रयुक्ता विभक्तिः अथवा क्रियायाः विशिष्टः प्रयोगः समुचितो न वेति विचारणीयमिदम्, तद्यथा- 'प्रविश पिण्डीं' तथा 'प्रविश तर्पणम्' [15] इत्यत्र 'प्रविश गृहं पिण्डीं च भक्षय' इत्यर्थो निष्पद्यते। अर्थात् गृहं प्रविशतु पिण्डीं च भक्षयतु। एवम्प्रकारेणैव 'प्रविश गृहं तर्पणं च कुरु' अर्थात् गृहं प्रविशतु तर्पणञ्च करोतु इत्यनयोर्वाक्ययोः 'गृहम्' इति कर्मकारकपदस्याभावे 'प्रविश' इति क्रियापदस्य, 'भक्षय' इति क्रियापदस्य चाभावे 'पिण्डीम्' इति कर्मकारकस्य प्रयोगः कथं सम्भाव्यत इति विचारणीयमिदम्। एवमेव 'अलं महीपाल तव श्रमेण' [16] तथा 'शतेन वत्सान् पाययति' इति वाक्ययोः कस्यचिद्विशिष्टक्रियापदस्याभावे क्रमशः 'श्रमेण', 'शतेन' चेतिकरणकारकस्थतृतीयाविभक्तिः कथं वाऽभवदिति विचारणीयम्। एवमेव 'फलेभ्यो याति' इत्यत्र 'फल' शब्दे तथा 'नमस्कुर्मो नृसिंहाय', 'स्वयम्भुवे नमस्कृत्य' इत्याद्युदाहरणस्थ 'नृसिंह''स्वयम्भु' शब्दयोः कस्यचिद्विशिष्टक्रियापदस्याभावेऽपि कथं सम्प्रदानकारकस्थचतुर्थीविभक्तिः प्रयुक्तेत्यूह्यम्। अत्र कथनमिदं यत् 'याति' तथा 'नमस्कृत्य' क्रियापदे स्तः, अतस्तत्कारणाद्विभक्तिः प्रयुक्तेति नोचितं, यतः एतेषां क्रियाणां निमित्तत्वात्त्वत्र कर्मकारकेण द्वितीयाविभक्त्या वा भाव्यं, यथा- 'मुनित्रयं नमस्कृत्य' इत्यादिप्रयोगेष्ववलोक्यते। तथा तु उक्ते उदाहरणे द्वितीयाविभक्तिरनुक्ता(अनभिहिता) वर्त्तते। परं प्रश्नोऽयं समुदेति यदत्र द्वितीयाविभक्तेः स्थाने एतेषूदाहरणेषु अपवादस्वरूपा चतुर्थी विभक्तिः कथं संजाता? यद्यत्र कथ्येत यद्द्वितीये उदाहरणे 'नमः' इति पदस्य कारणात् 'नमः स्वस्तिस्वाहा.....'[17] इति सूत्रेण चतुर्थी विभक्तिरभवच्चेन्न, यतः 'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' [18]ति नियमात् कर्मकारकस्थद्वितीयाविभक्तिरेव बलीयसी।

एवमेव 'कस्मात्त्वम्'? 'नद्याः' इत्यादिषु कस्यचिदपि 'ल्यबन्त' सदृशस्य सामान्यक्रियापदस्याभावेऽपि अपादानकारकस्थपञ्चमीविभक्तिः कथं प्रयुक्तेत्यूह्यम्। एवमेव 'प्रासादात् प्रेक्षते', 'आसनात् प्रेक्षते' तथा 'श्वसुराज्जिह्लेती' त्यादिषु कस्यचिदपि विशिष्टक्रियापदस्याभावेऽप्यपादानकारकविशिष्टा पञ्चमी विभक्तिः कथं प्रयुक्ता? यतो वाक्यप्रयुक्तं क्रियापदमवलोक्यात्र तु 'प्रासादम्', 'आसने' तथा 'श्वसुरम्' एताभिः कारकविभक्तिभिर्भाव्यम्। पुनरयं प्रश्नः यत् कथमत्र उक्तपञ्चमीविभक्तिः?

अन्ते चैवमेव 'आजघ्ने विषमविलोचनस्य वक्षः' [19] इति भारविप्रयोगेऽपि 'आजघ्ने' इत्यत्र 'आङो यमहनः' [20] इति सूत्रेणात्मनेपदं कथम्? यतः प्रकृतसूत्रं स्वाङ्गकर्मरूपादकर्मकाद् 'हन्' धातोरेवात्मनेपदं विदधाति, यदा ह्यत्र 'विषमविलोचनस्य वक्षः आजघ्ने' (तेन महादेववक्षः आहतः) इत्यस्मिन्नर्थे 'वक्षः' इत्यस्य कारणादयं 'हन्' धातुः सकर्मकोऽस्ति।

उपर्युक्तेषु सर्वेषु प्रयोगेषु एकैव समस्या दरीदृश्यते यद्यदि क्रियाकारकयोर्जन्यजनकभावसम्बन्धस्स्वीक्रियते चेद्विशिष्टकारकाभावे विशिष्टक्रियायाः, विशिष्टक्रियायाश्चाभावे विशिष्टकारकस्य प्रयोगः कथं सुसङ्गतः? अस्योत्तरं द्विधा दातुं शक्यते।

प्रथमपक्षानुसारं भाष्यकारमतमिदं यत् सम्पूर्णवाक्यस्य स्थाने वाक्यैकदेशस्य तस्यैकावयवस्य वापि प्रयोगो दृश्यते। अत एव वाक्यैकदेशन्यायेन स ब्रूते यदत्र 'प्रविश पिण्डीं, लभस्व भक्षय वा' तथा 'प्रविश गृहं, तर्पणं कुरु' इति

---

[13] करणत्वार्थिकैव तथा (अपेक्षिता) इति कलापाः। तैराधारत्वं निरुच्यैव करणत्वस्य निर्वचनात्।। शब्दशक्तिप्रकाशिका-88

[14] एकतिङ् वाक्यम्। महाभाष्यम्-2/1/1

[15] महाभाष्यम्-1/1/45

[16] रघुवंशम्, सर्गः-2,श्लोकः-34

[17] अष्टाध्यायी-2/3/16

[18] परिभाषा-94

[19] किरातार्जुनीयम्-7/63

[20] अष्टाध्यायी-1/3/28

सम्पूर्णवाक्यस्य स्थाने 'प्रविश पिण्डीम्' इत्येतदेकदेशप्रयुक्तमवगन्तव्यम्।[21] अत एवात्र बुद्धौ प्रकरणादिभि: सम्पूर्णं वाक्यं परिकल्प्य अभीष्टं कर्मकारकं (गृहम्) क्रियापदञ्च (भुङ्क्ष्व तथा कुरु) अध्याहर्त्तुं शक्यते। पदमञ्जरीकारोऽपि भाष्याशयं स्पष्टयन् ब्रवीति यद्यथा एकदेशरूपशृङ्गेण गोरूपपूर्णसमुदायो बुध्यते, तथैव वाक्यैकदेशरूपेणापि पूर्णवाक्यं ग्रहीष्यते, तेनोक्ताभीष्टकारके क्रियासङ्गतिर्भविष्यति।[22]

द्वितीयपक्षानुसारं व्यख्यातारो मन्यन्ते यत् कामं वाक्ये क्रिया साक्षात्प्रयुक्ता साक्षाच्छ्रूयमाणा वा न स्यात्परं प्रकरणादिभिर्यदि तत्प्रतीयमानं गम्यमानं वा वर्त्तते चेदपि सा स्वबौद्धिकोपस्थित्या कारकस्था: विशिष्टविभक्ती: प्रयोजयति नियन्त्रयत्येव। यथोक्तमपि- 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका' (कारकविभक्तीनां निमित्तम्)।[23] अत: 'अलं महीपाल तव श्रमेण' इत्यत्र 'श्रमेण साध्यं नास्ती' त्यर्थे कृते 'साध्य' रूपक्रियार्थस्य प्रतीयमानत्वाच्छ्रमरूपकरण-कारके तृतीया विभक्ति: शास्त्रसम्मतमेव।

ध्यातव्यमिदमत्र यदाचार्यपाणिनि: 'अलम्' शब्दं 'पर्याप्तिसमर्थप्रतिषेध' रूपेष्वर्थेष्वपि पपाठ, तद्यथा- नम: स्वस्तिस्वाहास्वधालंवषड्योगाच्च [24], अलंखल्वो: प्रतिषेधयो: प्राचां क्त्वा।[25] एतेषु 'पर्याप्तिसमर्थ' रूपार्थवत: 'अलम्' इत्यस्य योगे तु चतुर्थी विभक्तिर्विहिता, यदाहि 'प्रतिषेध' रूपार्थवत: 'अलम्' इत्यस्य विषये आचार्यपाणिनिर्न किमपि निजगाद। स्यात्त्विदं यत् 'सह' वत् प्रतिषेधार्थकस्य 'अलम्' इत्येतस्य योगेऽपि तृतीयाविभक्तेर्विधानं क्रियेत। वस्तुत इदमाचार्यस्य वैचित्र्यमेव।

एवमेव 'शतेन-शतेन वत्सान् पाययती' त्यस्मिन्नपि 'शतेन परिच्छिद्य' (शतं-शतं वत्सान् विभज्य पायनम्) इत्यर्थे गृहीते 'परिच्छेदन' क्रियाया: गम्यमानत्वात्तस्य प्रतिशतं संख्याया: कारणेन 'शतेन' इति करणकारकस्थतृतीयाविभक्ति: समीचीनैव। एवमेव 'फलेभ्यो याती' त्यत्र 'फलान्याहर्त्तुं याती' त्यस्मिन्नर्थेऽध्याहारलभ्याया: तुमुन्नन्ताया: 'आहरण' क्रियाया: तथा 'नमस्कुर्मो नृसिंहाय' 'स्वयम्भुवे नमस्कृत्य' चेत्यत्र 'नृसिंहं स्वयम्भुवं च अनुकूलयितुम्' इत्यस्मिन्नर्थे तुमुन्नन्ताया: 'अनुकूलन' क्रियाया: उपपदक्रियाया: प्रधानक्रियाया: वा पूर्वं गम्यमानत्वादर्थात् क्रियार्थाक्रियाया अश्रूयमाणत्वे उपपदकारणाद्गम्यमाने 'क्रियार्थोपपदस्य च कर्मणि स्थानिन:'[26] इति सूत्रेण चतुर्थी विभक्तिर्भवति।[27] अवधार्यमिदं यद्यदि क्रियार्थाक्रिया अत्र श्रूयमाणा न स्याच्चेन्नात्र चतुर्थी, अपितु 'यस्य च भावेन भावलक्षणम्'[28] इति सप्तम्येव।

एवमेव 'कस्मात् त्वम्? नद्या:' इत्यत्र 'कस्मात् त्वमागतोऽसि? नद्या: आगतोऽस्मी' त्यस्मिन्नर्थे 'आगमन' क्रियाया: गम्यमानत्वादत्र प्रयुक्ता अपादानविषयिणी पञ्चमीविभक्तिरपि साधीयस्येव। एवमेव 'प्रासादात् प्रेक्षते' इत्यत्र 'प्रासादमारुह्य प्रेक्षते' इत्यस्मिन्नर्थे ल्यबन्ताया: 'आरोहण' क्रियाया:, 'आसनात् प्रेक्षते' इत्यत्र 'आसने उपविश्य प्रेक्षते' इत्यस्मिन्नर्थे ल्यबन्ताया: 'उपवेशन' क्रियाया: तथा 'श्वशुराज्जिह्लेती' त्यत्र 'श्वशुरं वीक्ष्य जिह्लेती' त्यस्मिन्नर्थे ल्यबन्ताया: 'वीक्षण' क्रियाया: लोपे सत्यपि तदर्थानां गम्यमानत्वात् क्रमश: कर्म-अधिकरण-कर्मकारकाणां स्थाने अपादानकारकविषयिणी विशिष्टा पञ्चमी विभक्ति: प्रयुज्यते, यद्धि सर्वथा व्याकरणशास्त्रसम्मतम्।

ध्यातव्यमिदं यत् पाणिनिव्याकरणप्रक्रियावलोकनेन तथा तु कर्माधिकरणकारकयो: क्रमश: द्वितीया-सप्तम्यो: स्थाने पञ्चमीविभक्तिप्रयोग: अपवादश्रेण्यामन्तर्भवति। परन्तु 'गम्यमानक्रियापेक्षापि कारकविभक्तिर्भवति' अनेन एष एव भाषावैज्ञानिकनियमो ध्वन्यते। तथ्यमिदमेव वार्त्तिककारोऽपि 'ल्यब्लोपे कर्मण्यधिकरणे च'[29] इति वार्त्तिकेन प्रतिपादयामास। अनेन सिद्ध्यति यत् क्रियां विना वाक्यं न भवति। अपादानकारकस्य तृतीयो भेद: 'अपेक्षितक्रिय:' वाक्यविषयकमतिगभीरं भाषावैज्ञानिकं तथ्यं सङ्केतयति। एवमेव 'आजन्ने विषमविलोचनस्य वक्ष:'

---

[21] अथवा दृश्यन्ते हि वाक्येषु वाक्यैकदेशान् प्रयुञ्जाना: ......प्रविश पिण्डीम्, प्रविश तर्पणम्।। महाभाष्यम्-1/1/45

[22] संज्ञाशब्दस्यैकदेशे लुप्ते कथं संज्ञिनोऽवगम:? अत्राहु:- एकदेशेन समुदायोऽनुमीयते विभाषेणेव गौ:, सोऽनुमितोऽप्यर्थस्य वाचक इति।। पदमञ्जरी-5/3/84

[23] वैयाकरणसिद्धान्तकौमुदी-2/3/23

[24] अष्टाध्यायी-2/3/16

[25] अष्टाध्यायी-3/4/18

[26] अष्टाध्यायी-2/3/14

[27] फलेभ्यो याति फलान्याहर्तुं यातीत्यर्थ:। नमस्कुर्मो नृसिंहाय नृसिंहमनुकूलयितुमित्यर्थ:, एवं स्वयम्भुवे नमस्कृत्येत्यादावपि।। वैयाकरणसिद्धान्तकौमुदी-2/3/14

[28] अष्टाध्यायी-2/3/37

[29] अष्टाध्यायी-1/4/31-सूत्रे वार्त्तिकम्

इत्यत्रापि 'हन्' धातुमात्मनेपदयोगिनमकर्मकं कर्तुं प्रकरणानुकूलायाः 'प्राप्य' इति ल्यबन्तक्रियायाः अथवा 'भेत्तुम्' इति तुमुन्नन्तक्रियायाः अध्याहारः करिष्यते चेत् 'विषमविलोचनस्य वक्षः प्राप्य आजघ्ने' इत्यर्थः प्रस्फुटिष्यति। स्पष्टमिदं यदेतस्मिन्नर्थे अध्याहृतायाः, गम्यमानायाः प्रतीयमानायाः वा उक्तक्रियायाः कारणात् 'वक्षस्' शब्दः एतासां क्रियाणां कर्म भविष्यति, न तु 'हन्' क्रियायाः। एवम्प्रकारेण 'हन्' धातोः अकर्मकत्वादत्रात्मनेपदम् अव्याहतरूपेण सिद्ध्यति।[30]
एवम्प्रकारेण उपर्युक्तविवेचनादयं निष्कर्षो यत् क्रियाकारकयोः सम्बन्धो जन्यजनकभावः, तथा चोभे एव गर्भस्थशिशुवत् प्रत्यक्षगम्ये न भूत्वा केवलमनुमानगम्ये स्तः। उभयोर्विविच्यावगमनमशक्यम्। एवमेव कारकाणां विभक्तीनाञ्चापि सम्बन्धः अविभाज्यः। एते उभेऽपि व्यङ्ग्य-व्यञ्जकभावेन सम्बद्धे स्तः। कारकाणां प्रसङ्गे गम्यमानक्रियापूर्वककारकप्रयोगं भर्तृहरिरपि 'अपेक्षितक्रिय' इत्यादिभिरपादानस्य विभिन्नभेदैः प्रमाणयति। [31] एतदतिरिच्य विवक्षा, गौणमुख्यभावो, बौद्धिकारोपो वा कारकेषु तिरोहित इति वक्तुं न शक्यते, यतः कारकवस्तु स्थिरं नास्ति। विवक्षातः किमपि कारकवस्तु केनापि कारकरूपेणाभिधातुं शक्यते। कारकाणां प्रयोगे तदभिधानानभिधानज्ञानमपि आवश्यकमेव। अस्य ज्ञाता, वाग्योगविच्छब्दमनीषी एव सम्यक्कारकाणि प्रयोक्तुमर्हति। अन्ते च नेदमावश्यकं यत् क्रिया सर्वदा श्रूयमाणा एव स्यात्, अनेकत्र गम्यमाना प्रतीयमाना वापि क्रिया कारकविभक्तीर्नियन्त्रयति। परन्तु तेन क्रियाकारकयोर्जन्यजनकभावसम्बन्धे न कश्चित्प्रतिकूलः प्रभावः।[32]

## समीक्षा
प्राचीनानां नव्यानाञ्च वैयाकरणानां सैद्धान्तिकमान्यतानुसारं कारकाणां स्वरूपस्य तद्भेदानाञ्चाध्ययनेन फलतः प्राप्तानि तथ्यानि निम्नबिन्दुभिः प्रकटीक्रियन्ते-

- कारकाणां स्वरूपं वाक्ये क्रियानिष्पादकतायां क्रियासम्बद्धतायां वा निर्भरम्।
- कारकाणि प्रतिपादयितुं तदवबोद्धुं वा क्रियास्वरूपज्ञानमनिवार्यम्।
- सर्वासां भाषाणां वाक्येषु क्रियापदं भवति ध्रुवम्। वैयाकरणानां दृष्ट्या वाक्यार्थप्रतीत्याधारेण वाक्ये क्रियापदस्य महत्त्वं सर्वाधिकं वर्त्तते।
- वाक्यगतानि अन्यान्यपदानि क्रियानिष्पत्त्यै विभिन्नसम्बन्धैः सम्बध्य कारकरूपेण व्याक्रियन्ते। यथा क्रियाव्यापारस्य साक्षान्निष्पादिता कर्त्ता भवति, तथैव कर्त्तुः क्रियया इष्टतमं कारकं कर्म साधकतमञ्च कारकं करणं कथ्यते।

## सन्दर्भ

1. अष्टाध्यायी सूत्रपाठः, पाणिनि, सं. ब्रह्मदत्त जिज्ञासु, श्री रामलाल कपूर ट्रस्ट बहालगढ़, सोनीपत 2007
2. पदमञ्जरी, हरदत्तमिश्र, सं. पुल्लेल श्रीरामचन्द्रुडु, विठलदेवुनी सुन्दरशर्मा, संस्कृत परिषद् उस्मानिया विश्वविद्यालय, हैदराबाद, 1981
3. परिभाषावृत्तिः, सीरदेव, चौखम्बा प्रकाशन, बनारस, 1987
4. महाभाष्यम्, पतञ्जलि, सं. पं. शिवदत्त शर्मा, चौखम्बा संस्कृत प्रतिष्ठान, जवाहर नगर दिल्ली, 1988
5. वाक्यपदीयम् (स्वोपज्ञवृत्ति एवं पद्धतिसहित), भर्तृहरि, सं. के.ए.सुब्रह्मण्य अय्यर, डेक्कन कालेज, पूना 1966
6. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वबोधिनीसहिता), भट्टोजि दीक्षित, मोतीलाल बनारसीदास, दिल्ली 1982
7. शब्दशक्तिप्रकाशिका, जगदीश तर्कालङ्कार, चौखम्बा संस्कृत सीरीज, वाराणसी, 1973


[30] कथं तर्हि आजघ्ने विषमविलोचनस्य वक्ष इति
भारविः .......प्राप्येत्यध्याहारो वा भेत्तुमित्यादि वा .....भेत्तुमित्यादि तुमुन्नन्ताध्याहारो वाऽस्तु।। वैयाकरणसिद्धान्तकौमुदी-1/3/28
[31] वा.प.-3/7/136
[32] अवनिश्रीः- कारकों के प्रयोग में क्रिया की भूमिका, पृ.सं.-402